**R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जून–जुलै – २०२२**

**सत्र २ रे**

**विषयः आर्ष महाकाव्ये आणि पुराणे** (19R426)

**दिनांक :११/०७/२०२२** **गुण : ६०** **वेळ : स. १०.०० ते दु. १२.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ सूचनानुसारम् उत्तरत ।** **(०६)**

१) वृद्धान् – – – – –वयसो विदितात्मतत्त्वान् । योग्यरूपं चिनुत –(पञ्च , दशार्ध , द्वादश)

२) चतुर्युगनामानि लिखत ।

३) तस्मै स्वलोकं भगवान् – – – – – सन्दर्शयामास । (सत्यजितः, सभाजितः, सुपूजितः)

४) पक्षः – – – – – अहानि शुक्लः कृष्णश्च मानद । ('पञ्चदशन्' इत्यस्य योग्यरूपं लिखत ।)

५) अणुद्वौ परमाणू स्यात् – – – – – त्रयः स्मृतः । (त्र्यणुः , त्रिरेणुः , त्रसरेणुः)

६) भगवतः द्वौ पार्षदौ कौ ?

**प्र. २ सर्वेषां श्लोकानाम् अनुवादं माध्यमभाषया कुरुत ।** **(१८)**

१) तामिमां सर्वभूतानां नमस्कार्यां यशस्विनीम् । अभिगच्छतु वैदेही वृद्धामक्रोधनां सदा ।।

२) प्रतीपस्तु महीपालस्तामुवाच मनस्विनीम् । करवाणि किं ते कल्याणि प्रियं यत्तेभिकाङ्क्षितम् ।।

३) गीतं नृत्तं विचित्रं च वादित्रं विविधं तथा । शिक्षयिष्याम्यहं राजन्विराटभवने स्त्रियः ।।

४) शैलप्रस्थेषु रम्येषु पश्येमान् कामहर्षणान् । किंनरान् द्वन्द्वशो भद्रे रममाणान् मनस्विनः ।।

५) मृदुर्वदान्यो ह्रीमांश्च धार्मिकः सत्यविक्रमः । राजंस्त्वमापदा क्लिष्टः किं करिष्यसि पाण्डव ।।

६) न्यवेदयत्ततः सर्वं सीता रामाय मैथिली । प्रीतिदानं तपस्विन्या वसनाभरणस्रजाम् ।।

**प्र. ३ केचन द्वे टिप्पण्यौ लिखत ।** **(१०)**

१) अनसूयया सीतायै प्रीतिदानम्

२) प्रतीपेन सह गङ्गायाः संवादः

३) भगवता ब्रह्मदेवाय स्वरूपस्य उपदेशः

**प्र. ४ कौचन द्वौ प्रश्नौ सविस्तरम् उत्तरत ।** **(२०)**

१) विराटनगरे प्रच्छन्नवासविषये युधिष्ठिरभीमार्जुनाः किं निश्चितवन्तः ?

२) जयविजयशापवृत्तान्तं वर्णयत ।

३) रामेण चित्रकूटपर्वतस्य शोभा कथं प्रतिपादिता ?

**प्र. ५ ससन्दर्भं स्पष्टीकुरुत । (केचन त्रयः)** **(०६)**

१) त्वयाहं तोषितः सम्यग् वेदगर्भसिसृक्षया ।

२) ब्रह्मतेजः समर्थोऽपि हन्तुं नेच्छे मतं तु मे ।

३) स एवान्येष्वधर्मेण व्येति पादेन वर्धता ।

४) पितुश्चानृण्यता धर्मे भरतस्य प्रियं तथा ।

५) न च तां किंचनोवाच त्यागाद्भीतो महीपतिः ।

----------